श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री शुकदेव विरचितं

# ॥ श्री मधुसूदनस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री मधुसूदनस्तोत्रम् ॥

ओमिति ज्ञानमात्रेश रोगाजीर्णेन निर्जितः।
कालनिद्रां प्रपन्नोऽस्मि त्राहि मां मधुसूदन ॥ 1 ॥

न गतिर्विद्यते चान्या त्वमेव शरणं मम।
पापपङ्के निमग्नोऽस्मि त्राहि मां मधुसूदन ॥ 2 ॥

मोहितो मोहजालेन पुत्रदारगृहादिषु।
तृष्णया पीड्यमानोऽस्मि त्राहि मां मधुसूदन ॥ 3 ॥

भक्तिहीनं च दीनं च दुःखशोकातुरं प्रभो।
अनाश्रयनाथं च त्राहि मां मधुसूदन ॥ 4 ॥

गतागतेन श्रान्तोऽस्मि दीर्घसंसारवर्त्मसु।
येन भूयो न गच्छामि त्राहि मां मधुसूदन ॥ 5 ॥

बहवो हि मया दृष्टा क्लेशाश्चैव पृथक् पृथक्।
गर्भवासे महद्दुःखं त्राहि मां मधुसूदन ॥ 6 ॥

तेन देव प्रपन्नोऽस्मि त्राणार्थं त्वत्परायणः।
दुःखार्णवपरित्राणात् त्राहि मां मधुसूदन ॥ 7 ॥

वाचा यच्च प्रतिज्ञातं कर्मणा नोपपादितम्।
तत्पापार्जितमग्नोऽस्मि त्राहि मां मधुसूदन ॥ 8 ॥

सुकृतं न कृतं किञ्चिद्दुष्कृतं च कृतं मया।
घोरे भवे निमग्नोऽस्मि त्राहि मां मधुसूदन ॥ 9 ॥

देहान्तरसहस्रेषु चान्योन्यं भ्रामितो ह्यहम्।
तिर्यक्त्वं मानुषत्वं च त्राहि मां मधुसूदन ॥ 10 ॥

वाचयामि यथोन्मत्तः प्रलपामि तवाग्रतः।
जरामरणभीतोऽस्मि त्राहि मां मधुसूदन ॥ 11 ॥

यत्र यत्र च यातोऽस्मि स्त्रीषु वा पुरुषेषु वा।
तत्र तत्राचला भक्तिः त्राहि मां मधुसूदन ॥ 12 ॥

गत्वा गत्वा निवर्तन्ते चन्द्रसूर्यादयो ग्रहाः।
कदापि न निवर्तन्ते द्वादशाक्षरचिन्तकाः ॥ 13 ॥

ऊर्ध्वपातालमर्त्येषु व्याप्तलोकजगत्त्रयम्।
द्वादशाक्षरात्परं नास्ति वासुदेवेन भाषितम् ॥ 14 ॥

द्वादशाक्षर महामन्त्रं सर्वकामफलप्रदम्।
गर्भवासनिवासेन शुकेन परिभाषितम् ॥ 15 ॥

द्वादशाक्षर निराहारो यः पठेद्धरिवासरे।
स गच्छेद्वैष्णवं स्थानं यत्र योगेश्वरो हरिः ॥ 16 ॥

॥ श्री मधुसूदनस्तोत्रं समाप्तम् ॥